श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीदेवराजगुरुभिरनुगृहीता

# ॥ पूर्वदिनचर्या ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ पूर्वदिनचर्या ॥

सौम्यजामातृयोगीन्द्रचरणाम्बुजषट्पदम्।
देवराजगुरुं वन्दे दिव्यज्ञानप्रदं शुभम्॥

अङ्के कवेरकन्यायास्तुङ्गे भुवनमङ्गले।
रङ्गे धाम्नि सुखासीनं वन्दे वरवरं मुनिम्॥ १ ॥

मयि प्रविशति श्रीमन्मन्दिरं रङ्गशायिनः।
पत्युः पदाम्बुजं द्रष्टुमायान्तमविदूरतः॥ २ ॥

सुधानिधिमिव स्वैरस्वीकृतोदग्रविग्रहम्।
प्रसन्नार्क प्रतीकाश प्रकाश परिवेष्टितम्॥ ३ ॥

पार्श्वतः पाणिपद्माभ्यां परिगृह्य भवत्प्रियौ।
विन्यस्यन्तं शनैरङ्घ्रि मृदुलौ मेदिनीतले॥ ४ ॥

आम्लान कोमलाकारं आताम्रविमलाम्बरम्।
आपीनविपुलोरस्कं आजानुभुजभूषणम्॥ ५ ॥

मृणालतन्तुसन्तान संस्थानधवलत्विषा।
शोभितं यज्ञसूत्रेण नाभिबिम्बसनाभिना॥ ६ ॥

अम्भोजबीजमालाभिरभिजातभुजान्तरम्।
ऊर्ध्वपुण्ड्रैरुपश्लिष्टमुचितस्थानलक्षणैः॥ ७ ॥

काश्मीरकेसरस्तोमकडारस्निग्धरोचिषा।
कौशेयेन समिन्धानं स्कन्धमूलावलम्बिना॥ ८ ॥

मन्त्ररत्नानुसन्धान सन्ततस्फुरिताधरम्।
तदर्थतत्त्वनिध्यान सन्नद्धपुलकोद्गमम्॥ ९ ॥

www.prapatti.com

स्मयमान मुखाम्भोजं दयमानदृगञ्चलम्।
मयि प्रसादप्रवणं मधुरोदारभाषणम्॥ १० ॥

आत्मलाभात्परं किञ्चिदन्यन्नास्तीति निश्चयात्।
अङ्गीकर्तुमिव प्राप्तमकिञ्चनमिमं जनम्॥ ११ ॥

भवन्तमेव नीरन्ध्रं पश्यन्वश्येन चेतसा।
मुने! वरवर! स्वामिन्! मुहुस्त्वामेव कीर्तयन्॥ १२ ॥

त्वदन्यविषयस्पर्शविमुखैरखिलेन्द्रियैः।
भवेयं भवदुःखानामसह्यानामनास्पदम्॥ १३ ॥

परेद्युः पश्चिमे यामे यामिन्यास्समुपस्थिते।
प्रबुद्ध्य शरणं गत्वा परां गुरुपरम्पराम्॥ १४ ॥

ध्यात्वा रहस्यत्रितयं तत्त्वयाथात्म्यदर्पणम्।
परव्यूहादिकान् पत्युः प्रकारान् प्रणिधाय च॥ १५ ॥

ततः प्रत्युषसि स्नात्वा कृत्वा पौर्वाह्णिकीः क्रियाः।
यतीन्द्रचरणद्वन्द्वप्रवणेनैव चेतसा॥ १६ ॥

अथ रङ्गनिधिं सम्यगभिगम्य निजं प्रभुम्।
श्रीनिधानं शनैस्तस्य शोधयित्वा पदद्वयम्॥ १७ ॥

ततस्तत्सन्निधिस्तम्भमूलभूतलभूषणम्।
प्राङ्मुखं सुखमासीनं प्रसादमधुरस्मितम्॥ १८ ॥

भृत्यैः प्रियहितैकाग्रैः प्रमपूर्वमुपासितम्।
तत्प्रार्थनानुसारेण संस्कारान् संविधाय मे॥ १९ ॥

अनुकम्पापरीवाहैरभिषेचनपूर्वकम्।
दिव्यं पदद्वयं दत्त्वा दीर्घं प्रणमतो मम॥ २० ॥

साक्षात्फलैकलक्ष्यत्वप्रतिपत्तिपवित्रितम्।
मन्त्ररत्नं प्रयच्छन्तं वन्दे वरवरं मुनिम्॥ २१ ॥

ततस्सार्धं विनिर्गत्य भृत्यैर्नित्यानपायिभिः।
श्रीरङ्गमङ्गलं द्रष्टुं पुरुषं भुजगेशयम्॥ २२ ॥

महति श्रीमति द्वारे गोपुरं चतुराननम्।
प्रणिपत्य शनैरन्तः प्रविशन्तं भजामि तम्॥ २३ ॥

देवी गोदा यतिपतिशठद्वेषिणौ रङ्गशृङ्गं
सेनानाथो विहगवृषभश्श्रीनिधिस्सिन्धुकन्या।
भूमानिलागुरुजनवृतः पूरुषश्चेत्यमीषामग्रे
नित्यं वरवरमुनेरङ्घ्रियुग्मं प्रपद्ये॥ २४ ॥

मङ्गळाशासनं कृत्वा तत्रतत्र यथोचितम्।
धाम्नस्तस्माद्विनिष्क्रम्य प्रविश्य स्वं निकेतनम्॥ २५ ॥

अथ श्रीशैलनाथार्यनाम्नि श्रीमति मण्डपे।
तदङ्घ्रिपङ्कजद्वन्द्वच्छायामध्यनिवासिनाम्॥ २६ ॥

तत्त्वं दिव्यप्रबन्धानां सारं संसारवैरिणाम्।
सरसं सरहस्यानां व्याचक्षाणं नमामि तम्॥ २७ ॥

ततः स्वचरणाम्भोजस्पर्शसम्पन्नसौरभैः।
पावनैरर्थिनस्तीर्थैर्भावयन्तं भजामि तम्॥ २८ ॥

आराध्य श्रीनिधिं पश्चादनुयागं विधाय च।
प्रसादपात्रं मां कृत्वा पश्यन्तं भावयामि तम्॥ २९ ॥

ततश्चेतस्समाधाय पुरुषे पुष्करेक्षणे।
उत्तंसितकरद्वन्द्वमुपविष्टमुपह्वरे॥ ३० ॥

अब्जासनस्थमवदातसुजातमूर्तिं
आमीलिताक्षमनुसंहितमन्त्ररत्नम्।
आनम्रमौळिभिरुपासितमन्तरङ्गैः
नित्यं मुनिं वरवरं निभृतो भजामि॥ ३१ ॥

ततश्शुभाश्रये तस्मिन्निमग्नं निभृतं मनः।
यतीन्द्रप्रवणं कर्तुं यतमानं नमामि तम्॥ ३२॥

॥ इति पूर्वदिनचर्या समाप्ता॥

www.prapatti.com